पंचाशत्तमोऽध्यायः॥५१॥कृष्णउवाच॥साधवस्ते वर्णिनोऽस्य ध्यानदृक्स्थिरतां सदा॥प्रपंतो वि
स्मयं प्रापुर्मुक्तानंदउवाचतम्॥१॥हृदयस्थैर्य सर्वकाले ते दृश्यते वर्णिसत्तम॥को देवता ध्याय
से त्वं वक्तुमर्हसि तत्तु नः॥२॥नीलकंठउवाच॥श्रीराधिकेशो भगवान्योऽस्ति सर्वेश्वरोऽनघ॥इष्ट
देवः स एवास्ति मम सच्छास्त्रसंमतः॥३॥ब्रह्मधर्मश्रीवादीनां देवानामपि दैवतम्॥वराहाद्यव
ताराणां धत्ते रूपमःपरं बृहत्॥४॥ध्यायामि तमहं नित्यं संपूजयामि च ते मुने॥कीर्त्तयामि च तन्नाम
यन्नाकृः कलितारकम्॥५॥संसारेऽस्मिन्मतं प्युंसां दुःखिनानां स्वकर्मभिः॥कृष्णमेकं विना नाम्या
गतिरस्ति कदाचिदहि॥६॥श्रीमतोऽस्य गवेंद्रस्य चरणांबुरुहान्मम॥अन्यत्राणुरपि प्रीतिः क्वापि
नास्ते च सर्वथा॥७॥कृष्णउवाच॥इत्युक्तवंतं तं ज्ञात्वा कृष्णभक्तं महामतिम्॥प्रीतो मुक्तानंदऊ
चे राजन्भागवतप्रियः॥८॥मुक्तानंदमुनिरुवाच॥सर्वे न जानामः श्रीकृष्णं वयमप्यधुनापि हि॥कृ
पयास्मद्गुरोरेव पश्यामो हृदयेऽपि तम्॥९॥रामानंदाख्ययोगीन्द्रः प्रसिद्धोऽस्ति गुरुः स्वयम्॥अस्माकं स

गुरुः सोऽस्ति श्रयणीयो मुमुक्षुताम् ॥ १० ॥ कृपां सकुरुते यस्मिन्समन्मा धीः समीक्षते ॥ गोलोकेः खंदरा 
सम्यं श्रीकृष्णं गुरजीकरम् ॥ ११ ॥ नवाद्ज्ञास्तुये ब्रस्मभक्तिधर्मतपोन्विताः ॥ मत्यसद्दर्शनं दत्तेतेभ्यः कृष्ण
स्तत्क्ष्याः ॥ १२ ॥ श्यक्रुपान १ उपामः श्रीकृष्णात्तं वंयत्विह ॥ यतस्तदात्मनाकृष्णः श्रेयसे वर्त्ततेन्नृ
णाम् ॥ १३ ॥ मुमुक्षूणां गुरुत्वं च नन्स्मि न्नेवह्हितृतले ॥ स्वयं कृष्णेन निहितमास्ति तं ज्ञानतात्मवत
॥ १४ ॥ अतो गुरुपदेब्रह्मन्नास्त्यमत्रहिंसाव्रतम् ॥ अत्र श्रीमज्जागवतश्लोकौ मृग्यो दिशाश्रमम ॥ १५
अस्माच्छोकादुपरते मयि ज्ञानं मदाश्रयम् ॥ अर्हंसु दुवणवाह्यासंप्रत्यात्मवतां वरः ॥ १६ ॥ नोद्वीग्य
वपि मन्मूनी यद्गुलेनार्हितः प्रभुः ॥ अतो मद्युनं लोकं ग्राहयन्निहतिष्ठतु ॥ १७ ॥ इत्थं प्राह स यं
कृष्णस्तस्मादयमिहानघ ॥ नमाश्रितास्तदाज्ञायांस्थिताः कृष्णं भजामहे ॥ १८ ॥ कृत्रतउवाच ॥
एवं मुक्तानंदवचः श्रुत्वैव तस्तस्य वर्णिनः ॥ पित्रुक्त नह्रुत्वादि स्मृतिरासीन्नरेश्वर ॥ १९ ॥ ततः प्रस
स्वकृष्णस्य कर्त्तुं दर्शनमुत्सुकः ॥ आसीदामानंदमुने कृपां संपाद्य सेवया ॥ २० ॥ ततः प्रणम्य तं श्रीता
माहभ्रहमपिस्न्मते ॥ यौ माकीनो नवामीति शामसनीयत्त्वयाहितम् ॥ २१ ॥ यथा च दर्शनं तस्य श्रीप्रं
मे स्यात्तथा कुरु ॥ इत्युक्तो जन्मकर्मादि स्वस्य संक्षेपतो ऽवदत् ॥ २२ ॥ ततस्तमप्रतन्मानं मानयन्नुस
दगुणी ॥ उवाच वर्णिहृधर्मोसि कृरुष्वेमार्थकं जनुः ॥ २३ ॥ सोऽप्यतं मन्नहरूष्याभीलास्तिकुजगपत्तने ॥ हिते 

सुधीः ॥ ५ ॥ वैराग्यस्यालिते पक्षेश्वो स्वामी सतु निष्ठितम् ॥ आगमिष्यति तत्र्वैवत्वं कृपालस्य दर्शन
म् ॥ ८ ॥ तपःकृशीकृतांगे न त्वया गंतुं न सोच्यतम् ॥ शाकंतत पस्विवरततो ऽत्र स्वस्थ मावस ॥ ९ ॥
इतो द्वरे पुरी साऽस्ति मथ्रेचाऽस्त्यब्धिवाटिका ॥ महती विष्मोत्ताराव सस्मन्भेदे ऽत्रतत ॥ १० ॥
अधुना त्वस्तु वृत्तांतां लिखितां पत्रिकामहम् ॥ स्वामिने प्रेषयिष्यामि खेदं किंचन मा कृथाः ॥ ११ ॥
तदुत्तरानुसाराच्च त्वया गंतिविचरणा ॥ कार्यामितिमतां श्रेष्ठ त्वरितो माभवाऽधुना ॥ १२ ॥ द्विनात
शक्तां तस्याश्रुंगमनं तु तवाऽनघ ॥ अभीष्टफरवदं नैव न विते सद्युमा अत्र न ॥ १३ ॥ कृत्रत उवाच ॥
एवमाश्वासितस्तेन सौ वसत्तत्र वर्णिराट् ॥ मुक्तानंदोऽलिखत्सञ्जीमुपविश्य रहःस्थले ॥ १४ ॥ स्वस्ति
श्रीमद्देन कृसहुणागणौर्नित्यं महासिद्धिर्भिनीनाशक्तिभिरप्युपास्थितपदं सद्रक्जद्धेतुं तम् ॥ से
लाविष्कृतमानुषाकृतिमर्हं श्रीस्वामिनं सद्गुरुं मुक्तानंदमुनिर्भुजंगनगरानंदन् नमामीश्वरम् ॥ १५
अत्र त्वत्कृपयैव जीजनगरेन स्मत्सदा ज्ञात्मनां भक्तानां वरिवर्ति सौख्यमथ तत्रैव्वं च यौष्माकक
म् ॥ आत्ना यांति वसर्वेणवहितवयं कर्तुमिहेऽत्रप्रभो पत्र प्रेषणकारणं भवति यत्तच्छ्रूयमेवादरात् ॥ १६
॥ अत्र कश्चन महामुनि वर्यः संगतोऽस्ति खलु कोसलदेशात् ॥ वर्त्तते घमनिसंततरेहो मूर्तिमन्तपस्वो
न्न मकांति ॥ १७ ॥ नीजकं च रतिसप्रथिताख्यो नीजकं च सम भूरिविरक्तिः ॥ नीजकं च समवच्चसकृज्जा

॥ स.जी.त्र० क्षोणीचक्रं गरिपुदर्पहरे रसः ॥ १८ ॥ वर्णिवेषधर एष महात्मा न्यासरूपमतत स्थितिमासः ॥ निर्ममे अ०५३ ॥
॥ २१२ ॥ षन्नयनः स्थिरगात्रो निष्परिग्रहरुदारमतिश्च ॥ १९ ॥ आसत एष च किशोरवयोः तत्तुल्यतां तीर्थप
रिक्षीजनदक्षः ॥ सूक्ष्मवक्रलघुमञ्जुलकेशः स्पष्टकोमलमनोहरवाक् ॥ २० ॥ श्रेलगंधमपि सोढुं
मशक्तो मानमत्सरविवर्जितचित्तः ॥ नस्पृहां हृदि तु कस्यचिदेष रूपमेकमपहाय करोति ॥ २१ ॥
नीर्णवल्कलमृगाजिनवासा मालिकाकररूलु क्रियएषः ॥ त्रिःक्षयन्नपि मुनीन्मुनीधर्मान्निष्य
तां न नतिनो स्वमुनीनाम् ॥ २२ ॥ किंचिदन्नमरसं क्व च भुंक्ते कापि किंचन फलं च दलं वा ॥ नीरमात्र
मपि च क्वचपीला वर्तते क्व च न वायुमपीत्वा ॥ २३ ॥ मैक्षभुक्तिविरेपदिनान्निक्षापि कार्हिचिदस्या
चितवृत्तिः ॥ नक्रतुक्रुचनतीपदिनाग्नीरस्य वै च रति कर्म मनुष्यैः ॥ २४ ॥ अस्य वासरुतुषडुमंमूलेष
हूषिधुवमभीष्टतरं गच्छति ॥ एवमसौ धवसतिं तु निजां तैवेति तंद्रिमवनेनसमानाम् ॥ २५ ॥ ग्रीष्म एष तु
रुधाग्निनिषेवी स्थंडिले स्वपिति चांबुदकाले ॥ शैशिरे शिशिरतोयनिवासी शोषयत्यविरतं निज
देहम् ॥ २६ ॥ बालखेलउचितं क्व वयो वा दुर्धनाक्व च सुसिद्धदशा वा ॥ वीक्ष्य तद्द्वयमपि ध्रुवमस्मिन्संशयाव
रूविपाहिनवंति ॥ २७ ॥ अस्य निर्मलतपोमयधाम्नि त्वल्पदुग्रतपसो रुचयस्तु ॥ सोमम्प्यगतभास्कररश्मी ॥ २१२ ॥

मोमैरिह पुनः समायास्यतिनिश्चितम् ॥ २८ ॥ नवेत्तदर्शने त्वाचेद् स्मदत्वमिसर्वथा ॥ विष्णुस्थानिवसाः
मैवतावदस्य तस्य वर्णिवत् ॥ २९ ॥ ततः सम्यवसतत्रसद्भिर्मानितआदरात् ॥ तस्यागमं प्रतीक्ष्येव स्वध
र्मंपालयन्नृप ॥ ३० ॥ निर्मानः सन्निवेवेतांस्तत्र तान्साधुवर्णिनः ॥ पत्रकाशकरीषाद्यानयपाक
क्रियादिभिः ॥ ३१ ॥ आर्तानां सेवनं चासौ सदन्नौषधवारिभिः ॥ पादसंवाहनाद्यैश्च तत्र स्यानांचुद
चरत् ॥ ३२ ॥ तस्य साधुगुणानद्रष्टु दृष्ट्वा पान्थयनैरपि ॥ स्वगुणाविवतस्मिंस्तेबभूवुः स्निग्धचेतसः
॥ ३३ ॥ सोपिसाधून्सेवमानोधर्मं न किंचन तज्जनु ॥ नपपवाचन्विनममुदवै स्तोत्क्रमानसः ॥ ३४ ॥ नि
वसन्प्रागवांस्तत्रगृहैश्मपीनन्नाटपृत ॥ तेषांस्वस्मिन्स्नेहवृद्धिः स्यादद्यषावशत्तेनया ॥ ३५ ॥ क्वचि
तकचिन्मितैस्त्वयं किंचित्किंचिदर्दर्शयत् ॥ न रासभोसाधु तां च कलायोगासउकराः ॥ ३६ ॥ ध्या
पं तोविजने रूपं सतः केचिन्न दृबुने ॥ रीतमेवदरश्च स्तिनः स्वंदिव्यविग्रहम् ॥ ३७ ॥ रामानंदस्य
रूपं चतमेवदृद्धिके चन ॥ तमेवस्फुरितं संतोयपारहं मनोकृपन् ॥ ३८ ॥ कृचित्तेहृदयेरष्टा वार्णि
रूपं स्वणांतरे ॥ तमेवदद्दशुःसंतो नारायणमृषिं पुनः ॥ ३९ ॥ अलौकिकत्वमित्यं तेतस्यदृष्ट्वानमीप्स
रम् ॥ मेनिरे स्वन्नारायणतस्य तद्दिस्मृतिं यथु ॥ ४० ॥ केषांचिद्ध्यानकालेषु यच्च नात्रूपमंयोजित
म् ॥ मनोग्मस्वत्रनरेश्वरस्य त्तानवोपयत् ॥ ४१ ॥ तेनाः तिविस्मितास्ते च ततद्रूपस्यनिश्चयम्
॥ कर्तुं न शक्ता नृपते नम से वंत्तेरव वतत् ॥ ४२ ॥ कृचिच्चेतीकचिद्दौतिं कचिद्दस्मा द्रिक्कः क्रियाः साश्च

॥स॰जी॰प्र॰ र्यं ददृशुस्ते च तस्य स्वेषां सुदुष्करान् ॥ ३९ ॥ प्राणायाम प्रभेदांश्च मुख्य केन सहैव तान् ॥ कृच्छ्रांश्चान्द्रायणा अ॰५३॥
॥११२॥ मासयोगिनामपि विचक्षणान् ॥ ४० ॥ एकैकांगेकृति तस्य समाधौ प्राणधारणाम् ॥ विलोक्य साधुवृ
न्देन विविदू राजयोगिनम् ॥ ४१ ॥ या याः काश्चित् क्रिया तस्य तपश्चर्यादिकास्तप ॥ तासां निखिला वृद्धे वा
सौदुष्करत्वान्मुग्धा वृषि ॥ ४२ ॥ अजौ किंकं क्रियौ येवं स साधुगुणमाश्रितः ॥ हास वत्साधुसेवायो
म वर्त्तत सतां प्रियः ॥ ४३ ॥ समागतानन्यसत्वेन तत्र सोभ्यागतानपि ॥ तत्तदीप्सितदानेन तर्पयामास
सर्वज्ञः ॥ ४४ ॥ तपांत आसार सहो हिमतौ पाद्यः स्थितिः पंचतपानि दाघे ॥ वं समत्वतत्रोऽग्रत ग्राः स
स्त्वंविस्मापयामास तपस्विनस्तान् ४५ ॥ इति श्रीमत्संगिनीचरित्रेनारायणचरित्रे धर्मज्ञान श्री मधमश्र
करणे रामानंदस्वामिगुरुत्व निरूपणं नाम द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ सूत उवाच ॥ वसतस्त
स्य राजेंद्र तत्र सन्मंदिरे हरेः ॥ मासस्थैर्येणोपसतोपि नागात्स्वामी तु तत्र सः ॥ १ ॥ तदा तिं चिंतयाऽखि
न्यस्तद्रिदृक्षाद्रुतां ततः ॥ गंतुं भुजंगनगरं हरिरेवं निराज्ञावत ॥ २ ॥ अस्तुत्कं तस्त तस्तस्य दर्शनार्थं स
र्वाणिराट् ॥ मुनिं सद्यग्रगण्यं तं प्रणम्येदं वचोऽब्रवीत ॥ ३ ॥ कथं नायाति नः स्वामी पुरेऽस्मिन्नत्र कृतः सतः
तत्कृता मासमर्यादा अतिक्रांता महामुने ॥ ४ ॥ प्रतिबंधो भवति किं ममाऽदृष्टेन दारुणे ॥ अन्यथा स
कथयनेषांक्त तं त्रैजगतां गुरुः ॥ ५ ॥ अहमेव गमिष्यामि मुनेतन्निकटेऽधुना ॥ आज्ञा प्रदीयतां मत्तुंग
तु भुजगपत्तनम् ॥ ६ ॥ मनिरुदाकु माकर्ण्य तं तु गंतुं समुत्सुकम् ॥ मल्लाकैः श्रीणयस्त्वाहमुक्तानंदमुनिः ॥११२॥

दीपकांतिसमतामुपयांति ॥ २८ ॥ वेत्ति यः सकलयोगकलावासो विशिष्य पदवीमनलेऽस्य ॥ कौशलं कि
मपि कोपि नरोऽस्मिन्नैव दर्शयितुमात्मनरदे ॥ २९ ॥ शास्त्रनाजकमनेन किंयद्वास मुद्रोरधिगतं भवतीति
निश्चयं तु विरधीतयुमान् यः सोऽत्र कश्चन न भाति पुरे वै ॥ ३० ॥ अभ्यमत्यमपि कुर्वति वाऽस्मिन्नंकुषितार्
वधियो विदुषां वै ॥ सौगत कर्कशतयः प्रतिवादे मन्मनाव समुपयांति सभायाम् ॥ ३१ ॥ संज्ञायं कमपि शास्त्र
विदापि स्पृष्टएव कृटिति त्वमिवैष्णः ॥ युक्तियुग्वकुविधोत्तरदानेरेव किंप्रभुरितिभ्रमहृन्नः ॥ ३२ ॥ ध्यान
मास्थितवतां च मुनीनां सुस्थिरासनदृढं स्थितिभाजाम् ॥ मानसं बहिरितः क्वचनिर्यद्वेस्य साविदिव निजांतर
साक्षी ॥ ३३ ॥ तीक्ष्णदुर्जनवचः शरवृंदैर्भिद्यते न हृदयं किल चास्य ॥ मे ह्रतं तरदृढ तरक्षमया तद्[illegible] समता
मुपयाति ॥ ३४ ॥ अन्यदुःखजवदर्शनमात्रात्त्वस्तरोऽद्रवत एव हृदोऽस्य ॥ मार्दवस्य कणिका किमु लभ्य पद्म
कोशानवनीतशिरीषेः ॥ ३५ ॥ साधुतां तु निखिलानिजरक्षा वीक्ष्यते मुनिवरेऽत्र यथा वै ॥ न श्रुतातन्व तु तथा
कुत्रचनपौर्त्वां विहायजनतागुरुमेकम् ॥ ३६ ॥ एतदीयचरितं मितिलं वै वीक्ष्यते न तस्मि मम सपि भाति ॥ अ
स्यदीपमतिदार्ढ्यपरीक्षां कर्त्तुमागतरहास्ति भ[illegible] वान्किम् ॥ ३७ ॥ दर्शनो सुकमनास्त्व वचा साधुद्युतोपि सम
यानिषिषेधे ॥ प्रेषयेयतमहं तव पार्श्वं सांप्रतं किमु न वेत्ति तु जेरव्यम् ॥ ३८ ॥ एतेन सूचनाहेतोः पत्र मेतद्

स॰ सी॰ अं॰

॥ ११३ ॥

यामास ॥ लिखितं तद्विलोक्यैव पत्रे ध्यं श्रीपूज्यं तदुत्तरम् ॥ ३९ ॥ मुनेः पुत्रकुलाकिंस्मा लिखनेन ततः प्रभो ॥ एतान् अ॰ ५३ ॥
देव लिखितं कृपाकार्या सदा मयि ॥ ४० ॥ कन्नलतउवाच ॥ पत्रमित्यं निरीक्ष्यासौ पवर्णी राजजनयाद्रसः ॥ स्वामि
नो लिखितं पत्रं मयात्र मपि तल्लिख ॥ ४१ ॥ पत्रं विलोक्य भवतः शीघ्रमायास्यति प्रभुः ॥ इत्युक्तस्तेन मुनि
नासौ लिखस्तत्रिकां सुधीः ॥ ४२ ॥ उपविष्टपरहः स्थले निजोरे फलके का कुद पत्रकं निधाय ॥ स तु दक्ष
करात्तलेखिनीको लिखति स्मान तकंधरः सुवर्णम् ॥ ४३ ॥ इति श्री सर्वज्ञ ग्रीजीवनेनारायणचरित्रे धर्मसागरे
प्रथमप्रकरणे मुक्तानंदलिखित पत्रिकानिरूपणनामा ऽष्टपंचाशत्तमोऽध्यायः ॥ ५३ ॥ कन्नलत उवाच ॥ स्व
भावगर्भितां पत्रीं वर्णीदः समयाऽलिखत ॥ तथा तान् पत्रे तुभ्यं कथयामि निशामय ॥ १ ॥ स्वस्ति श्री विजस्
दुर्गं नगरे राजाधिराजश्रियायुतांघ्रिः समयपन्नगं विजयते श्रीकृष्णभक्तिं भुवि ॥ नाना सद्गुणसन्मणी
द्भिरचिता कल्पो गुरूणां गुरुः स्वेच्छाकृष्णनिजाश्रितारिवल्लभयः श्रीस्वामी सुदारश्रवाः ॥ २ ॥ साक्षाद्वृत्तरूपस्त
नुभृतां निःश्रेयसायाऽवितुं धर्मस्याऽजयाविप्रस्यासु मतौ जातो ह्ययोध्यापुरे ॥ स्वामिंस्त्वं भगवंतमेव शान्त्रो
न त्वानिपत्य क्षितौ वित्तसिंचिद धिलदेकशरणो हे नीलकंठ द्विजः ॥ ३ ॥ विहाय संबंधिजनान्विजानन् हं नि
नं चढें शं किलकोस जामि धमू ॥ तीर्थानि कुर्वन्निह लोजपत्तने स्थितोऽस्मि संगत्य विभोत्वदाश्रितान् ॥ ४ ॥ ॥ ११३ ॥

कृष्णस्य साक्षाद्धमीक्षणार्थं मत्तव्य मे वेहतपांत आदरात् ॥ त्वं तु मासं स्तुतुरः करोमि तद्वारणपा
रणामितसुरीरितम् ॥ ५ ॥ मासोपवासं विदधे तथोर्जे कृच्छ्राणि चाकर्हि चिरं कुर्वे ॥ चांद्रायणं चानघमा
घमासे पाराकृकृच्छ्रं च विभीतदर्पम् ॥ ६ ॥ एकादशीमुख्यतमानि येषां व्रतानि नित्यानि च तानि कुर्वे ॥ कृष्ण
स्यतोषाय तदेहदुःखं किंचिन्न चित्ते गणयामि नूनम् ॥ ७ ॥ हित्वेंद्रियार्थं च च शब्दमुख्यान्नुद्दत्र ज्ञानप्र
तु जत्रं ताप ॥ [illegible] वपुर्मया वैचके तपोभर्जित रक्तमांसम् ॥ ८ ॥ तद्दर्शनाज्ञामृतवल्लिमिका
मानं व्यदेहे त्यस्तवस्थलं ति ॥ तत्त्वन्य दालं बनमस्ति तेषां पिपासता मन्म विहीनदेहात् ॥ ९ ॥ निरन्नदे
हे ऽस्थिपंजर सोमानाः प्राणाममदीयाः प्रगतार्ति हंतः ॥ अनात्मकेत्यात्र कलौ नराणां कुर्वंति वै सत्सयुग
धर्मं तु ॥ १० ॥ अष्टांग योगाभ्यसनार्जितेन कृपामये श्रूयं बलेन सर्वाः ॥ दैत्यान वनं नीतिविभो विदित्वा
कृपां कुरुष्व मयि कृष्णकृष्ण ॥ ११ ॥ पिता च माता मम कृष्ण एव स्वामी च बंधुश्च गुरुः सुहृच्च ॥ तस्मिन्मम
[illegible] स्तिगुर्वो त्वमचत्तुमाद्यदितत्परत्वम् ॥ १२ ॥ पंचेंद्रियाणां विषयोपभोगप्रदस्य मिः पित्स सुरु
कमेम्य ॥ कृष्णेन चेत्स्यादनुरागदृष्टीनं तर्हि जत्यारिपु वहिस्यद्यः ॥ १३ ॥ स्नेहेन मत्तोषणकारिणो पिता
तं प्रसं सोदरमप्यः हं स्वम् ॥ वीक्षेय चेत्त द्विमुखान्कदाचिज्जद्यः प्रजत्यां किमु तान्य बंधून् ॥ १४ ॥ ज्ञायत

स॰मी॰ प्र०॰ दित्वंनिजवंधुवर्गत्यागेनवेहोपरतीहृषच्चि॥ तद्भक्तिहीनानिजवंधुवोपि प्राचीनमन्त्रैर्वंदुभिः प्रहाताः॥१५ अ॰१४
॥२२४॥ विभिषणोभ्रातरमप्यहासीत्त्वसूस्वकीयांभरतश्च तदत॥ कुलेनहीनंविदुरोऽपिभक्तः सर्वान्स्वबंधून्नपि
चर्षिपत्न्यः॥१६॥ श्रीकृष्णसंगप्रतिषेधकर्तृन्गोप्योजहुः स्वांश्चपतीनपीत्थं॥ कुटुंबिनोऽलब्धतनयं च वेनं
तत्काननृपोगोपिजगाममदावन्॥१७॥ रत्नादयः संतिविभीतदुमेके तद्भक्तिहीनस्यजनेनतेनोत्र॥ नेवाऽप की
र्तिः क्वचनापितेषांलोकेनवज्ञानेऽपिचकीर्तिरस्ति॥१८॥ ईहकुसंतोवर्त्मेनवंसनादिक्रमेणमयाऽतःश्रुतदीप
नके॥ विधीयतेप्रेमविमुक्तिहेतुर्नाऽस्यत्रतुकापिपदार्थरेखा॥१९॥ संतोऽत्रयेसंतिचतावकीनानिर्वृतध
र्मामनतेतुभृत्याः॥ सर्वस्वमेतेचभवंतिमेवैमाहात्म्ययुक्तस्त्वरभक्तिबोधाः॥२०॥ येषांनतस्मिन्निहभक्तिना
म्नासंगोऽस्तितान्वैपिनशाननंहंतु॥ जनमचकौलेयकवंशतुल्यान्यदीक्षणेनापिभवेद्धिदोषः॥२१॥ सत्कान्त
येवेवपिकेऽत्रसौख्येनिदानयकोधपद्मर्मेजुषाः॥ तेषांनराणांचविभोपद्मनांवाह्येविशेषंनहिकंचनापि
॥२२॥ नजन्मदेवाविदशालयेयत्तुवंतितत्तेषुनकिंचिदस्ति॥ तद्भक्तियुक्तानमनंतजन्मरेवस्तुतत्त्हंमस्तीसह
मीशजाने॥२३॥ तद्भक्तिहीनःकुलरूपकीर्तिनानागुणैश्वर्ययुतोऽपियस्तम्॥ अंतर्विषंचीक्षणमात्ररम्यं
फलंगवाक्षारवजंवदामि॥२४॥ अल्पोपितद्भक्तिगुणेननराणांयात्रात्नाकरोऽन्यैर्वगुणान्नशोभान्॥ सुसंहृ ॥२२५॥

तान्याऽस्तिवमऽत्रकोशाकान्हेयाभवंतीतरयातुतेवे॥२५॥ तद्दास्यहीनःस्वतपोबलेनप्रसादिलोकानपि
चेत्स्वयायात॥ तत्रापिकालाद्भयमस्तितस्यनानंतसौख्यंत्विति वेदसिद्धम्॥२६॥ ब्रह्मेशशक्रा अपिसिद्धि
मालोब्रह्मैश्यनिवाश्च शुकादयोऽस्यकुर्वंतिनक्किंनतुमानहीनायथेतरेसंस्तुतिमुक्तिकामाः॥२७॥ तस्मि
न्गुणाःसंतिहितादृशावैभक्तिंययानुक्तिजुषोऽपिकुर्युः॥ राधारमाद्याअपिशक्तयस्तंभजंतिसम्राजमि
वस्वदास्यः॥२८॥ अज्ञाश्चजीवाअपितस्यभक्त्याभवंतिनूनंगतकालभीकाः॥ विनातुतांब्रह्मसमुखेश्वराणा
मप्यस्तिकालाद्भयमेवभूरि॥२९॥ माहात्म्यमीदृग्भुवितस्यसम्यक्सञ्ज्ञासु तत्त्वाऽहमवेत्सभक्तिम्॥ तत्रैव
कुर्वैविदधत्तपांसिमनकृपिपियोग्यातिविहायतेशम्॥३०॥ प्रसक्तवीक्षामनवाप्यतस्यनस्वास्थ्यमाप्नोमि
तदुत्कचेताः॥ अत्रत्यसदाकुशुणाववद्धोवर्त्तेप्रतीक्षागमनंतवैव॥३१॥ कीर्तिविनातस्यमनोज्ञगानंवि
चित्रपद्यानिचलोकशब्दाः॥ तदेकचित्तस्यममैवकर्णौतिम्मागश्शूलानिविमिहोपयांति॥३२॥ स्त्रियःसुरूपा
अपियातुधानीसमाहिमेदृष्टिपथंप्रपन्नाः॥ अंगारवत्तस्यसुपुष्पमालाभवंतिकंठंचममोपपन्नाः॥३३
॥ श्रीखंडकाश्मीरजकेसरादिविलेपनंमेशिवितिपकतुल्यम्॥ तच्चिंतनेकात्मरतेमुनींद्रआसादवपोपिव
नायतेमे॥३४॥ घनानिसूक्ष्माणिसदंशुकानिव्यालास्यकृष्णाहिसमानिदेव॥ विचित्रलोलानिविपापमानि

स॰जी॰प्र॰१ नवर्ततिमे तद्धि हरेर्हातुरस्य ॥३५॥ यत्किंच लोके सुखहेतुरुक्तं तदस्तु मे दुःखमयं हि नाति ॥ तस्मात्वलोकं न गवन्नल अ॰५४॥
॥२२५॥ ब्धा मातो स्मि चोन्मत्तदशामहं वै ॥३६॥ मनोरथस्यास्य फलोपलब्धिस्त्वदंघ्रिसंसेवनमेतदेव ॥ कथंचना
पीहभवेन्न मे वैकलोक्यमेवास्तिजगद्गुरुर्यत् ॥३७॥ अतः कृपामाशु विधाय नाथ स्वदर्शनं देयमुदारकीर्ते
॥ यावन्न देही निपतेन्मदीयो दयानिधे स्यात्स्थितजीवबंधो ॥३८॥ सुव्रत उवाच ॥ पत्रमित्थं नीलकंठो लिखित्वा
भक्तिमातः ॥ मुक्तानंदाय मुनये ददातिस्म जनाधिप ॥३९॥ स्वपत्रं तस्य पत्रं च सोप्येकीकृत्य बुद्धिमान् ॥ सं
वाच्य मुहुः पित्रा च नामोपर्यलिखद्गुरोः ॥४०॥ मयरामाख्यविप्रेण साकं तत्प्रेषयत्ततः ॥ सभावान्छी प्रगति
नासदर्थं तु विशेषतः ॥४१॥ भुजंगनगरं प्राप्य ससमेहनिसद्द्विजः ॥ यद्देगांगेयभक्तस्य तं ददर्श जगद्गुरुम्
॥४२॥ भक्तानानंदयंतं च वनजिनदलख्यायताक्षि द्वयं तं गौरांगं पुष्पगात्रं शशधरवदनं श्रीमदाजानुबाहु
म् ॥ वक्षःश्रीवत्सलक्ष्मानं कुटिलजितनश्क्रकेशिमे दहासं प्रसन्नं शोणं भोजन्मराजन्मृदुलपदयुगं संप्रणम्यार्पयत्त
त् ॥४३॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे प्रथमप्रकरणे श्रीनीलकंठलिखितपत्रिकानिरूप
णनामा चतुःपंचाशत्तमोऽध्यायः ॥५४॥ सुव्रत उवाच ॥ वाचयामास तत्पत्रं द्वयं समुनिराट् ततः ॥ प्रसन्नोऽभूत्स
मायातं विदित्वा वर्णिसत्तमम् ॥१॥ स्वस्मिन्भावं तदीयं च तत्पत्रार्थं च वाचयेत् ॥ अभूत्स्फुरदेकं वस्त्रसाधु नेत्रो ॥२२५॥

जगद्गुरुः ॥२॥ पत्रवृत्तांतमखिलं भक्तान्स्तुरद्दरजिन्मुखान् ॥ श्रावयन्स दसिश्वामी प्रशशंस च तद्गुणान् ॥३॥
ततस्तमाशु मासयितुं मुक्तानंदाय धीमते ॥ स्वयं लिलेख पत्रं च ततश्चोत्तरगर्भितम् ॥४॥ स्वस्रःस्तु लोभा
ख्यपुरे वसन्मुः साधुभ्य आनंदितदुःखितेभ्यः ॥ बृहद्व्रतं चास्तु निरंतरायं ब्रवीति यस्त्वा हसमञ्जुजातः ॥
५॥ भुजंगपुर्यां वसतामवरामानंदेन वर्णी सहितो मुमाशीः ॥ ज्ञात्वाऽस्मदीयं कुशलं च मुक्तानंदेन वेद्यं
नगवन्प्रसादात् ॥६॥ पत्रं लयाथस्य परामनाम्नो विप्रेण साकं प्रहितं तदासम् ॥ तदा च यित्वा निखिलो प्यदं
नीमयाय यावद्दि विदेलदीयः ॥७॥ बुधस्य वृत्तांत उदारबुद्धे स्तच्चागतस्याप्यच वर्णिराज ॥ अस्याप्यस्ति वृत्तिः
स कृताऽस्ति मस्यास्ततो न साधारणपूरुषोऽसौ ॥८॥ श्वेतातरीयात्तु निरन्नमुक्तः कश्चिन्मुनीशो वदरायना
द्या ॥ परस्त्वयाचीति कमागतः स्यादिति ध्रुवं मे प्रतिभाति चित्ते ॥९॥ अतः परं तस्य मनोनुकूला सेवा विधेया
सततं भवद्भिः ॥ सद्भिः समस्तैः स्ववृहद्व्रतस्य गुप्त्यै ततो योगकलाश्च शिक्ष्याः ॥१०॥ नेतीच धौतिर्दिविधान्व
बस्तिर्नौलीक्रियाः कौंजरिकादयश्च ॥ शारीरशुध्यै प्रथमं तु शिक्ष्या अष्टांगयोगश्च ततः क्रमेण ॥११॥ यमाश्च
शिक्ष्या नियमासनानि प्राणोपयामो बहुभिः प्रकारैः ॥ प्रत्याहृतिश्च धारणा च ध्यानं समाधिश्च ततुक्त
रीत्या ॥१२॥ अष्टांगयोगाभ्यसनं विना तु बृहद्व्रतं सिध्यति नैव शुद्धम् ॥ अतस्तदभ्यासपरैर्भवद्भिः साध्यं तदात्म

स॰जी॰प्र॰ व्रतं रक्षणाय ॥ २३ ॥ ये ब्रह्मचर्यं तु दृढस्वरूपं योगीश संसाधयितेन्द्रियाः स्युः ॥ ब्रह्मात्मना कृष्णमथो भजेयुः २५५ ॥
॥ २२६ ॥ श्रीकान्त एवोत्तमभक्तसंज्ञाः ॥ २४ ॥ सर्वोपर्य इत्यास्य बृहद्व्रतस्य संपादितस्याप्य वनैर्विधेयम् ॥ कामाख्यशत्रो
त्रोर्वनिताप्रसंगस्तवात्मना हरतएव हित्वा ॥ २५ ॥ यो ब्रह्मचर्यं परिपातुमिच्छेत्स बुद्धिपूर्वं वनितां न पश्येत ॥ स्त्री
णां कृपाणो भ्रमणं प्रयातवार्तास्तासां गुणान्नापगुणान्वदेत् ॥ २६ ॥ गच्छेन्न यो यत्र मणःप्रयुज्येत् बालामपीक्षे
तधियान नग्नाम् ॥ स्त्रीणां न चित्रं प्रतिमां च पश्येन्न च स्पृशेत्क्लेवलि रेखितं च चित्रम् ॥ २७ ॥ न नर्मवार्ताः क्व च ना
पि कुर्यात्स्त्रीभिर्न नाचेत्तव किंचनापि ॥ स्त्रीभिः सहाध्वन्यपि नैव गच्छेन्न वोपयेताः पुरुषांतरेण ॥ २८ ॥ स्त्री
शेष्यं च स्त्रीपरिधार्यवस्त्रं संकल्पनं तद्धि च यं च न कुर्यात ॥ आणां तु काले पिन बुद्धिपूर्वं स्पृशेत्तदंगं त्विह ह्यु
त्तमभक्तः ॥ २९ ॥ स्यात्तत्क्रियायत्र च यत्र याय कुर्यान्न तां तामपि तत्र तत्र ॥ स्त्रीभ्यः स्वयं तु रहस्तमितां नरेण गच्छे
त्स्वपेन्नैव गृहे स योषे ॥ ३० ॥ रक्ष्यं सदाचारपरस्तु योगी स्यादृढैरेत्य विधिमुख्यवृद्धः ॥ एतैरुपायैः स्वबृहद्व्रतं
तत्कामाख्यशत्रोः परिरक्षणीयम् ॥ ३१ ॥ कुर्यादरस्यं न सतत्त्वजितोपि योगी स्वसंकल्पवशात्प्रसंगम् ॥ स्त्रीणां
करोत्येव ततोस्य मात्राहृत्तु ता स्पृहतः पैति दुःखम् ॥ ३२ ॥ क्रोधस्य मानो मदमत्सरौ च लोभस्तथैष्याविविधोर
सत्त्व ॥ एतेपि योगस्य भवंति विघ्नास्तस्मात्ततो योगिजनेन हेयाः ॥ ३३ ॥ आहारनिद्रे विदधीत युक्ते कार्ये स्व ॥ २२६ ॥

योगी व्यसनं तु किंचित् ॥ सेवेत नैवाश्ययसुरां च मांसं न च स्पृशेद्रोहधियैसजेत्तु ॥ ३४ ॥ देहेन वाप्यामनसा च हिं
सां कुर्यान्न कस्यापि न चात्मनोपि ॥ स्तेयं च सांकर्यकरं च कर्म हितार्थिना योगिजनेन वर्ज्यम् ॥ ३५ ॥ एवंविधा
ये पुरुषा भवेयुः स्वधर्मनिष्ठाः सुविरक्तधर्मभक्ताः ॥ प्रसन्नता तेषु सदा ममास्ति प्रेष्ठास्त एवात्र मम धर्मदस्य नो ॥ ३६
॥ तस्मात्त्वबुद्धेत्वमपि स्वकीयैः साकं सतीर्थ्यैर्मुनिनीलकंठवर्णीसु तारुरुत्वे न गृहाणयोगं वर्तस्व धर्मेषु म
योदितेषु ॥ ३७ ॥ तपः कृशः स्यास्त यथोपयुक्तैः सेवा विधेयाग्र्यजनादिभिस्त्वं ॥ वयो वरत्वादिह वाज्ञबुद्धिर्नका
पि कार्यान्तपसां निधीन ॥ ३८ ॥ आगामिष्यामि निदाघकाले रामप्रतीते पिप्पलनाम्निवेरे ॥ तावद्भवद्भिः सतु
सेवनीयो यथा न गच्छेदति निःस्पृहोसौ ॥ ३९ ॥ सुव्रत उवाच ॥ पत्रोत्तरं लिखित्वेत्थं मुक्तानंदं प्रति प्रभुः ॥ उ
त्तरं नीलकंठस्य पत्रिकायाश्च लेख सः ॥ ४० ॥ स्वस्ति स्ताद्वर्णिराजेऽमृतनिलयमहामुक्तमुख्यातिधाम्ने ती
र्थैः स्ती येस्तयोर्निर्जनदृढदिदृक्षध्धलेधर्मपुत्र त्वरां कामम् ॥ रामानंदस्य वाच्या निगमनिगदितुः आत्रिंपो धर्मर
क्षोवकृत्तेनत्वपाति मुदितमुनिना श्रेयसे नीलकंठ ॥ ४१ ॥ पंचमार्तं त्वदीयं तदुदितमखिलं बुद्धमेवास्ति
कृत्स्नं देहाचारस्तपस्ते त्विह कलियुगे दुष्करो मर्त्यधर्मैः ॥ वैराग्यं ज्ञानभक्ती दृढतरनियमा धर्मनिष्ठा च योगा
तिरेतस्याग्रकस्मिंस्त्वयि गतमिह तद्विस्मयो नात्र कार्यः ॥ ४२ ॥ ध्याने यादृशमेव पश्यसि सदा कृष्णमीक्षितना

स॰जी॰प्र॰ रक्षतस्त्वं तथा न परत्र सत्सु निवसन्कुर्याः प्रतीक्षां मम ॥ ग्रामे पिप्पलनाम्नि राघवविरतो युष्माभिरायाय तत्त्वाप्तास्मा अ॰५५॥
॥२२७॥ न्मदीक्षितवतत्त्वं नवताऽऽगमंच सद्भिः सह ॥ ३३ ॥ मद्दीक्षोस्तु कतास्तितेऽत्र ज्ञापिता जाना मिलत्कारणं मार्गः सां
प्रतमस्ति दुर्गमतरः कंकादिधारीनयात् ॥ नागंतव्यमिहात्त एव भवता मय्यस्ति चेदिच्छया स्तत्रैतन्मममानयं
ईत्वमेनं योगं सतः शिक्ष्यसे ॥ ३४ ॥ अंगस्तु कंपनवतो मद्दीक्षणं कृते याहृग्भवत्संतरे नारम्मे पितरेक्षणाय भव
तीलेवेलया बुधानाम् ॥ आयास्यामि ततोऽद्भुतं च नवतास्थेयं स्वधर्मे सदात्वादृग्धार्मिकभक्तसंगममहं पा
चेयशोऽर्तासुतात् ॥ ३५ ॥ येस्युर्धर्मपराय लोभ्युविजनास्तेऽतिप्रियाः संति मे ते यांदृरगतोन कार्हिचिदहं तत्र
त्यक्ष्यितत्त्वतः ॥ सेतत्स्वारणाएवमे बक्रमतायत्साद्वारिधुर्वं तीर्थभी पिन्दृणां विशुद्धिमधिकां स्पृष्टं विधत्ते दु
तम् ॥ ३६ ॥ भोजयंति भुवि प्रजयंति गायेतु साधुपुरुषान्मवादृशान् ॥ तैस्सुराचरमिदं सदैव तं पूजितं च बक्रुधा
सुभोजितम् ॥ ३७ ॥ प्रीतिरस्ति मनसस्तु यादृशी तादृशी तु न निजेऽपि चात्मनि ॥ सेत एव हृदयं भवंति मे कृत्स
भक्तिरसिकास्तु धार्मिकाः ॥ ३८ ॥ खेदितव्यमत एव न त्वया वीक्षणाय मम यत्नमागमः ॥ आवयोर्ष्टीतिसे भ
विष्यति ग्राम एव न तु पिप्पलाह्वये ॥ ३९ ॥ आगमोऽत्र भवता विनाज्ञया नैव कार्य इति मेऽनुज्ञासनम् ॥ विद्धि येव
यदि वागमिष्यसि प्राप्स्यसि न हि सुखं तदेप्सितम् ॥ ४० ॥ दर्शनप्रियतया ममत्वया किंचिदिव्यनतिलंघ्यसर्वथा ॥२२७॥

नाऽऽगमोऽवतु विधेय आदरः सत्तु कार्यं वरधा मदात्मसु ॥ ४१ ॥ क्षीणमेव नितरां वपुर्निजं येन चोग्रतप
सात्वयं व्रजेत् ॥ तादृशं तु न तदा चरेः पुनर्धर्मसाधनमिहास्ति यद्वपुः ॥ ४२ ॥ पातितेऽतितपसाति दुर्बले
दुर्लभे नरकलेवरे पुनः ॥ ज्ञानभक्तितपसां न जायते साधनं च निजधर्मवर्त्मनः ॥ ४३ ॥ तात मद्वचनतो
निजं वपुः पोषयेर्ममहिताय सर्वथा ॥ भूरि कार्यमपि मामकं त्वया साधनीयमिह वर्त्तते यतः ॥ ४४ ॥ क्रतुव्रत
उवाच ॥ लिखित्वा पत्रिकामित्थं रामानंदमुनिर्नृप ॥ मुद्रयित्वा ददौ तस्मै मयराम्याग्रजन्मने ॥ ४५ ॥ गृहीत्वा
तत्पत्रीं तां स च विप्रवरः पुनः ॥ आपापत्तनजपुरं तूर्णं सत्तमेऽक्लितदापत्र ॥ ४६ ॥ तच्च पत्रं स तत्रासादाम्मुक्ता
नंदाय वाडवः ॥ सोऽपि सर्वं सत्वर्णिने वाचयामास तन्मुनिः ॥ ४७ ॥ स्वामिनो मानयन्नाज्ञां तच्चोवास ततो ह
रिः ॥ अशिक्षतं तमुदासंतस्त्स्माद्योगकुजाम्ब्रते ॥ ४८ ॥ सत्रिक्ष्यामास यथोपदेशं तान्योगमष्टांगमशेष
मेव ॥ तेष्वल्पकालेन गुरोः प्रसादात्तस्मै व्रतस्थिरदर्शयामवापुः ॥ ४९ ॥ इतिश्रीसत्संगिजीवने नारायणचरि
त्रे धर्मशास्त्रे प्रथमप्रकरणे रामानंदस्वामिलिखितपत्रिकादयनिरूपणनामा पंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥
क्रतुव्रत उवाच ॥ वर्णिनो वसतस्तस्य योगं शिक्षयतः सतः ॥ तपस्स्तोत्य तीयाय तत्र मासस्तु माधवः ॥ १ ॥ अ
राग्ना वापरश्चो वान्हं नमायास्यति प्रभुः ॥ इति चिंतयतस्तस्य शुक्रमासाईमप्यगात् ॥ २ ॥ ततोऽतिआकुलो

वणी तपश्चिंतांतिकर्शितः ॥ तदागमप्रतीक्षार्तिः सा स्वं न प्रापकिंचन ॥ ३ ॥ अथासौ विसृतां स्वामी तद्दिदृक्षा
कृतान्तरः ॥ भक्तैः कतिपयैः साकमहितुर्या विनिर्ययौ ॥ ४ ॥ रथ्यं महान्तमारूढो हेमरत्नपरिच्छदम् ॥ पंक्तिद्वाः
संस्थितान् पौरान्पश्यन्मधुरया दृशा ॥ ५ ॥ शनैः नुयातः पूजितश्च पौरैः साश्रुविलोचनैः ॥ भक्तानानंदयन्मा
र्गे पिप्पलग्राममाययौ ॥ ६ ॥ नरसिंहाख्यविप्रस्य स भक्तस्य स मंदिरे ॥ तत्र च राजन्भगवान्मूर्त्या नानि जै
र्जनैः ॥ ७ ॥ ततः कुमारजित्संज्ञं दूतं लोजपुरं प्रति ॥ प्राहिणोत्सोऽखिलान्भक्तांस्तत्राकारयितुं निजान् ॥ ८ ॥ त
स्मिन्नेव दिने श्रीमान्स लोजपुरमेत्य तान् ॥ प्राह श्रीस्वामिना यूयमाहूताः स्थेति दोऽस्य कृत ॥ ९ ॥ श्रुत्वा मृतप्राय
मानं तद्वचस्तैः त्रिस्थुर्दर्यपुः ॥ अथैवं लततेला दूनीजकं वस्तदा वचः ॥ १० ॥ ततो विचार्य ते संतः सर्वे निश्चि
विधूद्ये ॥ अथ पुः पिप्पलग्रामं स्वगुरोर्दर्शनोत्सुकाः ॥ ११ ॥ मुक्तानंदमुखाः संतो भक्तवर्याश्च पर्वतः ॥ देवानं
दः परिव्राड्भक्ताश्च शादयस्तथा ॥ १२ ॥ स्वप्नेश्च दर्शनोत्सुक्यसमाकृष्टान्तरास्तु ते ॥ चिचेलुः सत्वरं मार्गे तैज
स्वी कृतसत्वरकम् ॥ १३ ॥ अतिकार्ष्यात्सुरीरस्य नीजकं वस्तुवर्त्मनि ॥ श्रीप्रांचन प्रास पूर्णं रुदपीस्य पतन्क्षि
तौ ॥ १४ ॥ किंचिद्यात्वाग्रतः पश्चात्तं पतन्तं तोऽग्रगामिनः ॥ ते संतः पतितं दृष्ट्वा तदंतिकमुपाययुः ॥ १५ ॥ पाद
संवाहनं चक्रुस्तस्य ते च शनैः शनैः ॥ किंचिदाश्वस्तमाजोक्य सोऽनुक्ते वर्णिनं वचः ॥ १६ ॥ दिने ऽत्रैवाऽस्ति गं ॥ ११८ ॥

तव्यः पिप्पलग्राममाशु नः ॥ आश्चपाऽतत्व ममजामात्मनो योगधारणाम् ॥ १७ ॥ तद्वेनाऽध्वनः पारं
यास्यसि वन चान्यथा ॥ रत्युक्तः स तथा चक्रे च चाल च पि सत्वरम् ॥ १८ ॥ भगवंतं तदि ध्यायन् धनुर्मुक्तः
शरो यथा ॥ सविस्मृत्य वपुस्तूर्णं सर्वेषामग्रतोऽचलत् ॥ १९ ॥ संतस्तमनुधावंतो प्रवापुर्नैव तत्पदम् ॥
भानुरीत्यत्व नीसंज्ञां नदीं सर्वे पितेरुताः ॥ २० ॥ दक्षिणे पिप्पलग्रामाद्दृष्टं तीकपुष्पोदकान् ॥ दृष्ट्वा बुपूर
तांभीमकूल्योजामतिदुस्तराम् ॥ २१ ॥ वर्णिराट् तां समुत्तीर्य सहसैव परं तरम् ॥ अनारूढश्च संतरं गौर्धैः
प्रापसन्मुख वर्त्मना ॥ २२ ॥ अर्वाक्षेव तदेतस्तु भक्ताः सर्वे तरं गोणीम् ॥ नाव्यां भीमां च पश्यंतो विदि
त्वाऽडस्तरांचताम् ॥ २३ ॥ महताऽथ प्रयासेन कोजमाश्रित्य तेऽरविजाः ॥ तामुत्तीर्य समेत्याशु पिप्पलग्रा
ममाविन्नान् ॥ २४ ॥ तेऽथ कृष्णद्वादशिका दिने पूर्वाह्ण एव ते ॥ नरसिंहद्विजगृहे ददृशुः स्वामिनं निजम् ॥
२५ ॥ गौरांगं पुष्टमूर्तिं सितवसनधरं स्वास्यमान्नानुवाकृपया क्ष्मेमदेहासं निजजननिकरैश्च दत्तैः पुष्प
हारैः ॥ भक्त्या संपूज्यमानं सदसि च्चिविततेदिव्यसिंहासनस्थं स्थीयान्नानंदयंतं परमसुखनिधिं स्वामि
नं ते प्रणेमुः ॥ २६ ॥ वर्णिराजं विजीक्याशु यावदुत्तिष्ठति प्रभुः ॥ साष्टांगं प्रणनामासौ तावद्भक्तोत्तमः स
तु ॥ २७ ॥ तमुत्थाप्य स बाहुभ्यां परिरभ्य निजांतिके ॥ उपावेश्य दन्यांश्च प्रणतान्समानयत् ॥ २८ ॥ च

स॰जी॰प्र॰१ लीढः स्वामिनं दृष्ट्वा स्तुतं सम्यग्यथा तथा ॥ निर्वृत्तिं परमामाप प्रेमाश्रुः पुलकान्वितः ॥२९॥ निमेषहीनया दृ अ॰५६॥
॥११८॥ ष्ट्या तद्रूपं तं स्वेक्षणो हरिम् । नादर्शं पैव दृष्टाऽपद्रूपन्मुहूर्त्तं द्वितयं स च ॥३०॥ प्रादिदृष्टानदीनं च ततः स्वस्थं त
मादरात् ॥ तद्रूपन्नृपश्च स स्वामी स्वागतादिपपीचितम् ॥३१॥ मुक्तानंदः कथितवांस्तद्वृत्तांतमशेषतः ॥ य
था स्वातंत्र्यतदा स्वामी वर्णिनं प्रशशंस तम् ॥३२॥ प्रेमणा गद्गदकंठेन स्तुत्वा तं वर्णिराडपि ॥ प्राहाऽद्य सफलो जा
तो मन्मनोरथपादपः ॥३३॥ साक्षाच्छ्रीकृष्ण चेदस्मभु विभक्तिप्रवर्त्तकम् ॥ त्वां प्राप्याऽद्य कृतार्थोऽस्मि नृ
जन्म फलितं मम ॥३४॥ प्रसन्नः कारयामास ततस्तस्य च तत्क्षताम् ॥ यथोचितं स त्वातिथ्यं स्वकरैः प्रय
त्नादिभिः ॥३५॥ प्रेमनिर्भरतविलोचनान्तयोः सिद्धयोरमृतसारवाचयोः ॥ वर्णिराजमुनिराजयोस्तदा योग
त्वापजनदर्शनीयताम् ॥३६॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे प्रथमप्रकरणे रामानंद
स्वामिसमागमनामा षट्पंचाशत्तमोऽध्यायः ॥५६॥ कवृत्तलउवाच ॥ ज्ञात्वा स्वामी प्रदोषेऽथ राधिकापीठपू
जनम् ॥ उपचारैर्महद्भिश्च यथाविधि चकार सः ॥१॥ एकादश्यां जागरणं ततः कुर्वन्निजैः सह ॥ स्वामी पुनर
इद्युते तत्र स्थाने माहितः ॥२॥ कुलं च पितरौ गोत्रं प्रवरान्द्देशिकं तथा ॥ वेदं शाखां स्वामिदैवं वैराग्यं स्वज
नत्यजिम् ॥३॥ वनवासं तपोभेदान्सांगयोगस्य साधनम् ॥ तीर्थयात्रां तत्र तत्र तैर्थिकानां समागमम् ॥४॥ ॥११८॥

एतत्सर्वः स्वामिना सौ यथावत्सर्वमादितः ॥ क्रमेण कथयामास त्वनुभूतं यथायथा ॥५॥ स विस्तरं तं
द्वृत्तांतं स श्रुत्वा प्रीतिमान्भृशम् ॥ प्राह त्वमस्मदीयोसि वर्णिन् धर्मस्य यत्सुतः ॥६॥ स हि प्रयागे संप्राप
भक्त्या सह पितामह ॥ दीक्षां भागवतीं धीमान्मत्त एव द्विजार्पितः ॥७॥ मदाज्ञया कोसलेषु सुमुक्षून्स
निजाश्रितान् ॥ उपादिशात्कृष्णभक्तिमहिंसादीस्वधर्मैः सह ॥८॥ त्वं तु तस्माद्पितुर्गुणैरधिकोसि महात्मनः
॥ अमर्त्यशांकां हृदये धत्से त्वं प्रपन्नतां नृणाम् ॥९॥ कवृत्तलउवाच ॥ अनुग्रहं स्वपितरि श्रुत्वा सौ स्वामि
नो नृशाम् ॥ मुमुदेऽथ गुरुं कर्तुं निष्ठिकापत्तमेव हि ॥१०॥ गुरोः कृष्णसमेत्यास्मिन्नेव हृष्टोऽस्ति निस्स
दा ॥ वरो चास्मिति गौः स तस्मै वै प्राह सत्तो हरिः ॥११॥ तत्रोवास स सुखेनैव सततोऽदृढनिश्चयः ॥ मानितो ब
हुधा तेन गुरुणेश्वररूपिणा ॥१२॥ आश्चर्यदर्शनं तं च नीलकंठं तपस्विनम् ॥ पश्यतां स्वामिभक्तानां वि
स्मयोऽभून्महानपि ॥१३॥ स्वयं स्वाम्यपि तं दृष्ट्वा योगिदुष्प्रापसद्गुणम् ॥ कृष्णस्यैव तनुं कांचिन्मेने धर्माव
नक्षमाम् ॥१४॥ सर्वज्ञो पुरुषस्तं तु साक्षान्नारायणोत्यम् ॥ इति नाऽवेत्सभो त्तस्मान रत्नाप्य विधिस्तपा
॥१५॥ उद्धो पीः पाः नवलोके कश्चन स्वामिनोंतिके ॥ बालो वर्णी त्यागतोऽस्ति तपस्वी योगिराडिति ॥१६॥
तद्दर्शनार्थमाजग्मुर्नानादेशोद्भवाश्चारतः ॥ सहस्रशो नरा नार्यस्त्यागिनो योगिनोपि च ॥१७॥ पत्र श्रुत्वा गु

स·नी·प्र· रुंकोवावलीयोऽद्य ॥ १७ ॥ गतोऽत्र सः ॥ तान्स्वामी दर्शयामास तलमं गुर्व्वान्तिके स्थितम् ॥ १८ ॥ ते वर्णिनं कृशात अ०१७ ॥
॥ १२० ॥ नुं वीक्ष्य तेऽतितपस्विनम् ॥ विस्मयं परमं प्राप्य पप्रच्छुः स्वामिनं पुनः ॥ १९ ॥ कुतो यमागतो वर्णी बालो
प्यतितपोबलः ॥ आश्चर्यं जनयन्नृणां वेत्ति योगकलांश्च यः ॥ २० ॥ उपवीती च जटिलः शान्तो धमनिसं
ततः ॥ ऊर्ध्वपुण्ड्रं च तुलसीमालिकां जिनं दधत् ॥ २१ ॥ उदासीनस्त्वासीनो ध्यानस्तिमितलोचनः ॥ देहा
नुसंधानहीनो निष्परिग्रहएषकः ॥ २२ ॥ तान्स्वामी प्राह बालोऽयं कोसलेभ्य उपागतः ॥ आस्तां नगव
तो भक्तौ पितरावस्य धार्मिकौ ॥ २३ ॥ भक्तिज्ञानविरागाणां माहात्म्यं तन्मुखादयम् ॥ शुश्राव बुद्धिमान्बा
लस्ततस्त्यागमुमैहत ॥ २४ ॥ उत्कंठितो यतक्रिश्चैत्यनाप्य गुरुत्तानान् ॥ हित्वा गत्वा वने घोरं तपश्चक्रे
ऽतिदारुणम् ॥ २५ ॥ तेनैव भक्तियुक्तेन यएमासाम्यंतरे हरिम् ॥ साद्रतीर्थानि चरन्यातोऽत्रास्ति यद्
च्छया ॥ २६ ॥ एतस्य चरितं त्वेतद्भवत्संसेवाऽस्ति निश्चितम् ॥ विदधुं प्रीणयन्तो बाल्येऽदुराराध्यं सुरैरपि ॥ २७ ॥
इति श्रुत्वा भगवतो वाक्यं ते विस्मिता जनाः ॥ ययुर्यथागतं तं नत्वा तं धृत्वा भंच तं हरिम् ॥ २८ ॥ सुबुद्धिमथ
तं राजन्क्रियायोगातिनैपुणम् ॥ उपहारान्कृतीस्वामी कृष्णार्चायाम पूपुजत ॥ २९ ॥ सोपि स्वधर्मेनक्किं
चपाजयन्नेवनित्यदा ॥ कृष्णार्चावसरे तस्य गुरोः सन्निहितोऽभवत् ॥ ३० ॥ स्नात्वा कुर्वति तस्मिंस्तु सध्या ॥ १२० ॥

दिनैत्यकं विधिम् ॥ करोति स्मार्च्चनविधेः पात्राणां परिमंजनम् ॥ ३१ ॥ पूजायां क्लिप्तमालायां तुलसीपुष्प
चंदनम् ॥ धूपं दीपं च नैवेद्यं तत्तत्कालउपाहरत् ॥ ३२ ॥ यथाकालमनुक्तोऽपि पदार्थं तं तमाहरत् ॥ दं भि
तस्तो हरिस्तेन गुरोरपि मनोऽहरत् ॥ ३३ ॥ वर्णिनः कृष्णसेवायां श्रद्धातिशयमुत्तमम् ॥ समीक्ष्य मुनि
शार्दूलस्य तत्राप्यासीन्नरेश्वर ॥ ३४ ॥ कृष्णस्तु नित्यमर्च्चायामाविर्भूयोरुवार्पितान् ॥ साक्षाद्दत्तोपहा
रांस्तेनदन्नमत्तु नैक्षत ॥ ३५ ॥ एकदा नीजकं वस्त्र सर्वचैवाधिकारिणः ॥ तस्य स्वप्ने क्षणायासौ प्रत्यक्षं कृ
ष्णमार्प्यपत ॥ ३६ ॥ भगवन्नीजकं वापमदस्त्वत्प्रत्यक्षदर्शनम् ॥ त्वयि प्रेम च तेऽस्मद्दे हि समनुणवाजिने ॥ ३७
॥ कृष्णत उवाच ॥ तथास्त्विति ततः कृष्णः प्रतिज्ञत्रैमहामुनिम् ॥ ग्रहस्य दर्शनं प्रादात्स प्रत्यक्षं स्वस्य वर्णिने ॥
॥ ३८ ॥ परिचर्यां गुरोः कुर्वन्हरिः श्रीकृष्णमैक्षत ॥ उपचारानाददानं प्रत्यक्षं स्वामिनार्पितान् ॥ ३९ ॥ नैवेद्यं स
मदंतं तं वीक्ष्य प्राप समुं भरम् ॥ पूजाकालेगुरोरित्थं सोऽपश्यदनुवासरम् ॥ ४० ॥ एकदा प्राह स गुरुं नील
कंठो रहःस्थितम् ॥ भक्तपूजावसरे पीत्थं कथं स्यात्कृष्णदर्शनम् ॥ ४१ ॥ यथोपहारान्गृह्णाति त्वया दत्तान्स्व
नित्यदा ॥ तथा मदर्पितान्नी तोगृह्णात्यति कदाच्युतः ॥ ४२ ॥ श्रीरामानंदमुनिरुवाच ॥ कृष्णदीक्षामवाप्तस्य
महत्त्वेवारनस्य च ॥ धर्मभक्तौ चाह तस्य साक्ष्यौ धं कृष्णवीक्षणम् ॥ ४३ ॥ कृष्णत उवाच ॥ सिद्धे वैसोऽयतंनि

॥ स·गी·प्र० सनक्किष्णकृपासमन्वितः ॥ चातुर्मास्यं व्रती पापलस्येत्थं कुर्वतः सतः ॥ ४४ ॥ विक्रमार्कस्य नृपतेरशादृशशीतौ अ०५७ ॥
॥ २२१ ॥ त्तरे सप्तपंचाशत्तमे वर्तमाने शाकस्य च ॥ ४५ ॥ एकादश्यां प्रबोधन्यामुत्तमायाधिकारिणि ॥ तस्मै दातु
महादीक्षामिच्छस्वंयाचते सताम् ॥ ४६ ॥ दीक्षां ग्रहीतुं महतीं सवर्णी गाढसमुत्सुकस्तस्य गुरोरनुत्तपा ॥ च
कार पूर्वेद्युरुपोषणं शुचिर्दिवा निशां त्वक्षरमेव संजपन् ॥ ४७ ॥ प्रमोदसंवत्सरकर्ज्जमासे शात्तः सिते का
रशिकादिने तम् ॥ स दीक्षयामास यथा विधानं महोत्सवेनैव सुदानरेंद्र ४८ ॥ इति श्रीसत्संगिजीवनेना
रायणान्दविरचिते धर्मशास्त्रेरूपमङ्करणेरामानंदस्वामिशुश्रूषणनाम सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ स्क
न्तउवाच ॥ एकादश्यां मुनिपतिराज्ञया ह्यवद्विजोत्तमम् ॥ निजाध्ववर्त्तिनं शान्तं दीक्षाविधिविशारदम् ॥
१ ॥ तेनैव कारयामास तत्त्वस्य सकलं विधिम् ॥ सोऽपि सर्वं यथाशास्त्रं करोति स्म यथोचितम् ॥ २ ॥ आदौ शा
रीरशुद्ध्यर्थं प्रायश्चित्तमकारयत् ॥ ततस्त्वाप्लायेन कुल्यानां त्रयाणां सहरिन्नृप ॥ ३ ॥ मुंडनं सर्वतो नरंना
नावर्णस्य शोभनम् ॥ विधाय स्नापयामास ततः कजलेगल्लव ॥ ४ ॥ तत्र ताम्रमयान श्वेतन्मधादिस्त्वस्वसुक
मात् ॥ एकं हेममयं मध्ये सोऽस्थापयदुदारधीः ॥ ५ ॥ सतो येषु सरत्नेषु सपत्रवफलेषु च ॥ सर्वास्वःस्तूर्णपा
त्रेषु तेषु देवानतिष्ठिपत् ॥ ६ ॥ श्रीराधासहितं कृष्णं तत्र मध्यघटे न्यधात् ॥ प्राच्यां नगवतीदुर्गां दक्षिणेना ॥ २२१ ॥

स्करं तथा ॥ ७ ॥ प्रतीच्यां विघ्नराजं च शिवं सौम्यामतिष्ठिपत् ॥ विष्वक्सेनं च वह्निदिग्भागे कृत्वा गरुडं च सः ॥
८ ॥ अस्थापयच्च कलशे वायव्यां पवनात्मजम् ॥ श्रीरामानेतथैशान्यां क्रमेणैव यथाविधिः ॥ ९ ॥ ततो वे
दपुराणोक्तैर्मंत्रैर्मूलेन चाह्निजः ॥ प्रधानदेवतां कृष्णं सहांगैराचैयत्सुरैः ॥ १० ॥ उपचारैः षोडशभिः सह
पंचामृतेन च ॥ महानैवेद्येन महादीपेन समपूजयत् ॥ ११ ॥ मृदंगकांस्यतालानां शंखानां नौबकीर्त्तनध्वनिः
॥ तूर्याणां कादिशब्देन मिश्र आसीन्महांस्तदा ॥ १२ ॥ संस्कृतायां ततो वेद्यां वह्निं संस्थाप्य चाजुहोत् ॥ मूलेन
मनुनाज्यस्य सोऽष्टोत्तरशताकृतीः ॥ १३ ॥ ततो महामुनिः प्राशान्कोपीनाच्छादनं सितम् ॥ उत्तरीयं च हरये
स्थितायथाप्रभुरालापसः ॥ १४ ॥ मासादिकौ नगावृत्तस्तु जस्ती काष्ठमालिके ॥ सूक्ष्मे नवीने सदृढौ कंठधापयच्च
तौने ॥ १५ ॥ कृष्णार्चाशिष्टगंधेन तुर्ड मुद्रं तदूर्त्तरे ॥ राधार्चाशिष्टकाश्मीरचंद्रकंचाप्यकारयत् ॥ १६ ॥ श्रद्दधु
त्स्वततः स्वामी ध्यात्वा श्रीकृष्णमस्य च ॥ अष्टाक्षरं कृष्णमंत्रं दक्षकर्णउपादिशत् ॥ १७ ॥ हृरपेशुद्धमतपेमं
त्रस्यार्थं ततो गुरुः ॥ यथावद्बोधयामास संप्रदायानुसारतः ॥ १८ ॥ क्षेत्रंपिरं च ब्रह्मसांशं द्विविधं योपिमन्यते ॥
अन्यस्तः सर्वविद्वाऽसौ क्षेत्रज्ञोऽक्षरोऽहमोच्यते ॥ १९ ॥ अन्वितं द्विविधे चानुवक्षेत्रज्ञैस्तन्मिर्यं तत्त्व ॥ व्यतिरिकं त
तो यच्च तद्वयाक्षरमुच्यते ॥ २० ॥ यमाश्रित्य सर्वे पतिश्रेवत्तामिदमक्षरम् ॥ पुरुषोत्तमसंज्ञोऽसावक्षरातीत

॥स.जी.प्र.५॥ उच्यते ॥२१॥ सएव श्रेयसे नॄणां धृतदिव्यनराकृतिः ॥ साक्षात्तं ज्ञानदानेन कर्षन्नॄन्कृष्ण ईर्यते ॥२२॥ प्रेमणा ॥अ०५८॥
॥१२२॥ तस्मैवनैनैव पच्छोभावन्त्त मात्मनः ॥ सएव रासज्ञाव्यो यो मंत्रेस्मिन् परिकीर्तितः ॥२३॥ आत्मीति पूर्णकाम
त्वं तेयेज्ञायेपि चात्मनः ॥ शोकाभावश्च विज्ञेयो मुक्तत्वाज्जीवतो यतः ॥२४॥ वैकुंठेऽथच गोलोके मूलहावे
वृहत्पुरे ॥ यथा प्राप्ता भगवतः पूर्णकामाश्च सेवया ॥२५॥ भक्ताः संति तथैवाऽत्र हरेः प्रत्यक्षजंभनात् ॥ से
वया चाऽस्ति पूर्णत्वमिति मंत्रार्थमाह सः ॥२६॥ अंतःकरणवृत्तीनां बहिर्गतिनिरोधनम् ॥ कृदिमकाशः
कृमिक्षमादित्याहुच तत्कृत्यम् ॥२७॥ मंत्रार्थं बोधयित्वेत्थं गुरुस्तं पुनरब्रवीत् ॥ यावद्देहस्मृतिस्तावद्धर्मं
कंचन न त्यजेः ॥२८॥ संति श्रुत्वा त्वया धर्मोऽस्मत्सदधानुसारिणः ॥ सर्वेपि जनकादेव प्राप्यं ते तेचनित्सदा
२९॥ अतत्वतन्नेव त्वान्मवां निवेशेषनियमांस्तु रे ॥ कृष्णावीं नियमेनांतर्बहिः कुर्याश्चनित्सदा ॥३०॥ पंचाध्या
यीं पठित्वादौ पूर्णां ते निजशक्तितः ॥ श्रीवासुदेवमाहात्म्यं पठेरेकाग्रमानसः ॥३१॥ गीतां कृष्णप्रसादाद्यऽन्वं वे
यं वाऽरिचतारद्वाम् ॥ अनर्पितं तु कृष्णाय नाऽद्य फलदजा...द्यपि ॥३२॥ नामसंकीर्तनं कुर्याः श्रीकृष्णस्य
च सर्वदा ॥ भक्तिं विना भगवतो व्यर्थं कालं तु मा कृथाः ॥३३॥ यत्र कृष्णस्य माहात्म्यं चरितं वा भवेन्मुने ॥ तत्र हि प
त्कथा श्रव्या प्रत्यहं नियमेनच ॥३४॥ तत्कथाश्रवणादेव तद्भक्तिर्वर्द्धते तराम् ॥ साऽतः श्रव्या वकृष्णा वेवा ॥१२२॥

क्ष्यासि नैव निस्तदा ॥३५॥ एवं धर्माननुपादिश्य रामानंदमुनिर्नृप ॥ तस्य त्रिमस्याभिधानं च चक्रेऽन्वर्थं विचार्य
च ॥३६॥ सहजानंद इत्यादौ प्रथमं नाम तस्य सः ॥ ततो नारायणमुनिरिति चक्रेऽभिधां स्वयम् ॥३७॥ तपसा
च स्वभावेन मूर्त्याकारेण सर्वथा ॥ नारायणमुनेः साम्यात्तामेवाख्यां मुदाकरोत् ॥३८॥ ततो हरिः स्वामिनं तं
पूजयामास सादरम् ॥ प्रदक्षिणां विधायैव वंदेऽन्ववरणानामथ ॥३९॥ साधून्विप्रांश्च सर्वान्विनयेनार्चयत्त
तः ॥ विप्राः समापयामास तद्दिनं विधिवत्तु सः ॥४०॥ वर्णांजलिपुरस्तस्मौ वर्णीराड्गुरुसन्निधौ ॥ तस्मै
प्रसन्नः सन्नाह स्वेक्षितं वृणु मद्वरम् ॥४१॥ नीलकंठ उवाच ॥ आविर्भूय त्वदन्त्र्यां पाँ साक्षात्कृष्णो यथाऽन्व
हम् ॥ उपहारान्समादत्ते नुं केहसत्तिजायते ॥४२॥ तथान्वहं मदर्चायामाविर्भूय स्वयं स च ॥ कुर्यादित्यस्ति मे
ऽभीप्सं रे हि प्रीतोऽसि चेदिदम् ॥४३॥ कृष्ण उवाच ॥ तथास्त्वित्याह मुनिरादरतस्तेप्रीतोऽपि तान्नित्रि ॥ सर्वे जाग
रणं चक्रुः कृष्णसंकीर्तनादिभिः ॥४४॥ अम्भोजनपात्रगे स्वामी विप्रान्साधूंश्च वर्णिनः ॥ तद्भीष्टैर्भक्ष्यभोज्यैस्त
र्पोऽदात्स्वदक्षिणाः ॥४५॥ हरेश्च पूजावसरे प्रत्यक्षः स्वामिवन्नृप ॥ उपहाररसादीनि कृष्णश्च केऽन्वास
रम् ॥४६॥ प्रत्यक्षकृष्णचीक्षात्रैः स संपूर्णमनोरथः ॥ कृतकृत्यं स्वमात्मानं गुरवे सैन्न्य वेदयत् ॥४७॥ राधया
सहितं कृष्णं कश्चित्त्वल्लक्ष्मे क्षत ॥ दिनुजं वादयंतेच वेणुं न र व राकृतिम् ॥४८॥ कश्चिद्रामेण सहितं कृष्णं

॥ स॰जी॰प्र॰१ ॥ ल्पासहितं क्वचित्त ॥ क्वाप्यर्जुनेन सहितं तत्क्वाप्येकमैक्षत ॥ ४७ ॥ द्विबाहुमर्पितं क्वापि चतुर्भुजमवैक्षत ॥ त अ॰५८ ॥
॥ १२३ ॥ तोऽस्य परमं चैमा हृष्यमेश्वर्यमानवर्द्धत ॥ ५० ॥ इत्थं च नानापरिशीलयन्हरिस्तपस्विजीजाविदधद्रेश ॥ शु
श्रूषणां कृष्णमधियानुकालं गुरोः करोति स्म भृशं विनीत ॥ ५१ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्म
शास्त्रे प्रथमप्रकरणे महादीक्षाग्रहणनामा अष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ सुव्रत उवाच ॥ ज्ञातेपि त्रिष्वतां
तस्मिन्स्वशुश्रूषारते हरौ ॥ स्वामिनः सविनावाशुः सर्वसद्गुणमंडिते ॥ १ ॥ बुद्धिमंतं तमेवासौ पृष्ट्वैव व्याव
हारिकम् ॥ अपि कार्यं करोति स्म नो चेच्च स्वमनोगतम् ॥ २ ॥ साकं तेन स्वभक्तानां ग्रामेषु विचचार सः ॥ रैव
तोपत्यकास्वेव कृष्णभक्तिं प्रवर्त्तयन् ॥ ३ ॥ क्वचिन्मासं क्वचित्पक्षं क्वचित्तं च दिनानि च ॥ वसन्नुपागमत्स्वा
मी जयंताख्यं पुरं नृप ॥ ४ ॥ उन्मत्तगंगाख्येन नृपेण धर्मनिष्ठेन तत्र सः ॥ बहुधा प्रार्थितोऽवात्सीज्ज्ञानानंदयन्वि
ज्ञान् ॥ ५ ॥ तत्र नारायणमुनिर्गुरुसेवापरायणः ॥ नित्यं तस्यावतिक्रम्य शिष्यान्सर्वान्निजैर्गुणैः ॥ ६ ॥ तस्मिं
स्त्विते गुणा नित्यमासन्नृपतिसत्तम ॥ सर्वत्र सर्वकालेपि स्वस्वरूपेऽचलास्थितिः ॥ सत्यं शौचं दया क्षांति
स्त्यागः संतोष आर्जवम् ॥ शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥ ८ ॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो
बलं स्मृतिः ॥ स्वातंत्र्यं कौशलं कांतिधैर्यं मार्दवमेव च ॥ ९ ॥ प्रागल्भ्यं प्रश्रयः शीलं सहओजोबलं भगः ॥ गां ॥ १२३ ॥

भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मौनमगर्वता ॥ १० ॥ अमानित्वमदंभित्वं मिताहारश्च दक्षता ॥ मैत्री सर्वोपकारि
त्वं कामैरक्षुब्धचित्तता ॥ ११ ॥ अद्रोहो मानदत्वं च षड्भिर्विजयस्तथा ॥ अपैशुन्यत्वं शरण्यत्वमनीहत्वाऽप
रिग्रहः ॥ १२ ॥ श्रीराधिकापरिवृढे भक्तिश्च परमाऽचला ॥ अतिथिभ्यागते निर्दंभं गुरुशुश्रूषणं तथा ॥ १३ ॥ त्रि
ष्वामुनिवर्ते स्वेतांस्तस्य सर्वाधिकान्गुणान् ॥ विलोक्य विस्मयं प्रापुः स्वाधिकं मेनिरे च तम् ॥ १४ ॥ गुरोः प्रि
यं कुर्वतोऽस्य वसतस्तत्र दंतिके ॥ वर्षद्वयं व्यतीयाय नारायणमुनेर्नृप ॥ १५ ॥ एवं विधं तमालक्ष्य रामानंद
मुनिस्ततः ॥ तस्मिन्स्वस्य धुरं स्थापयितुं तर्हि तु मैहत ॥ १६ ॥ सर्वेषां निजभक्तानामथ तेष्वेव तां सताम्
सकृच्चैव व्यवहारेषु विरक्तमपि योजयत् ॥ १७ ॥ श्रीरामानंदस्वाम्युवाच ॥ नारायणमुने धीमञ्छृणु मत्कामा
दरात् ॥ श्रुत्वा च त्वं तथैव त्वं कर्तुमर्हसि सर्वथा ॥ १८ ॥ एते मदाश्रिताः संति कृष्णभक्ता नराः स्त्रियः ॥ स्थाप
नीयास्त्वया धर्ममर्यादायां तु तेऽखिलाः ॥ १९ ॥ श्रीवासुदेवमाहात्म्यमत्र यापवार्त तेऽन्वहम् ॥ वर्णाश्रमवतां
धर्मास्तेन स्त्रीणां च संति हि ॥ २० ॥ यथाधिकारं ते ये च स्थापनीयास्त्वया जनाः ॥ शास्त्र्यं श्रीविष्णुनीतैकं कृष्ण
सेवनकर्म तु ॥ २१ ॥ व्रतानां तु स्ववानां च सर्वेषां राधिकापतेः ॥ प्रवर्त्तनीयुक्तस्त्वोक्तो निर्णयो वैष्णवो नितः
॥ २२ ॥ संप्रदायेस्थितिः पूर्वमासीद्रामानुजस्य नि ॥ तथैव महान्स्त्व चैवमेवैमं च रात्कृतः ॥ २३ ॥ ततो हिता

स॰जी॰प्र॰१ वास्तुमिवतरुत्वमेवं मयानुवि॥ तूर्णं प्रवर्त्तिते वर्त्मसच्छास्त्राण्यनुसृत्य वै ॥२४॥ अध्यात्मज्ञाननिष्ठैस्तु रा प्र॰ ५ अ॰
॥१२४॥ मानुजकृता मया॥ ग्रंथाः सस्थापितास्सन्ति कृष्णोपासनपोषकाः॥२५॥ अतो रूपाणि निश्शेषं तु जीवमाया
परात्मनाम्॥ रामानुजाचार्यकृतभाष्यादि त्वं प्रवर्त्तयेः॥२६॥ इत्याज्ञां मम पाल्यातेस्सर्वज्ञास्त्रार्थवेदितः॥
त्वमेक एव मद्ध्याने स्थातुमर्होसि सांप्रतम्॥२७॥ यस्मिन्दिने भगवान् रक्षत आरभ्य मे लयम्॥ मनोर
थोऽपवाञ्छितं त्वं पूरयितुमर्हसि॥२८॥ वैराग्यतीव्रतां वेद्मि तव नूनमहं मुने॥ तथाप्येतत्त्वयैव स्यात्कार्यं
नान्येन केनचित्॥२९॥ स्त्रीकार्यार्जनपूजा च वस्त्रालंकारसंयुता॥ आरोहणं त्वया कार्यं रथवाजिगजा
दिषु॥३०॥ सर्वतः कुजितो भेभ्यो रक्षणीयास्त्वमेव या॥ शक्तोसि रक्षणं कर्त्तुं त्वमेवैहतपोधन॥३१॥ इत्थं
स्त्रीभिः कृधा दोषाः परा भवा यो न सर्वथा॥ त्वमसीत्येव ज्ञानाभिगुणैः कृत्स्नमप्रदः॥३२॥ न धर्मसंकरं
कर्त्ता धीरो गांगेयवद्भवान्॥ भवतीति विदित्वैव स्वामित्वे स्थाप्यते मया॥३३॥ सुव्रत उवाच॥ श्रुत्वेति सद्गुरो
र्वाक्यं नारायणमुनिर्नृप॥ क्षणं विचिंत्य हृदि तं प्रत्युवाच विमनाऽरव॥३४॥ श्रीनारायणमुनिरुवाच॥ शिष्ये
णाज्ञा गुरोः पाल्या धर्मेण वसता ननु॥ तथाप्येतद्वचः कर्त्तुं प्रभो नाहं समुत्सहे॥३५॥ वर्णीधर्मान्समाश्रितस्य
स्थितस्य लघु सत्सते॥ एतत्तु द्ववनं मन्ये लोक शास्त्रानुगुप्सितम्॥३६॥ आघाय पशुं धमाचमपि कृवेयरः ॥१२४॥

पनम्॥ सोऽहं तासां कथं स्त्रीणां करिष्येनिकरे स्थितिम्॥३७॥ स्त्रीप्रसंगो मुमुक्षूणां महान्पापरो हि
बंधकृत॥ मुक्ताऽप्यःऽभवत्स्वरा वह्नवोयेन तत्क्षतो॥३८॥ नैष्ठिकव्रतवान्पुंस्त्रीनेदृहस्यापि वर्जि
तैः॥ कृष्णभ्रंगः स्त्रीप्रसंगाद्भूष्टोऽभृत्सद्य हृद्वतात्॥३९॥ संगात्संजायते कामः कामात्क्रोधोभिजाय
ते॥ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः॥४०॥ स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥
स्त्रीप्रसंगात्ततः स्वामिन्विवेनेस्यहमिहध्रुवम्॥४१॥ न कुर्यात्कर्हिचित्सख्यं मनसि त्यवस्थिते॥ यदि
स्यं माद्विरास्त्रीणां च स्कंदतप ऐश्वरम्॥४२॥ निसं ददाति कामस्य छिद्रं तमनुयेऽरयः॥ योगिनः कृतमैत्र
स्यपत्युर्नोयेव पुंश्चली॥४३॥ कामो मन्युर्मदो लोभः शोकमोहभयादयः॥ कर्मबंधश्च यन्मूलः स्वीकुर्यात्
को नु तद्बुधः॥४४॥ कर्त्तव्यो मनसः संगो यदि मृत्यानुकंपया॥ तत्राप्युपेक्षापुन्नैव यतः कर्मफलं जग
त्॥४५॥ ईयया ऽपिमनोन्यत्र कुध्यारो योल्पयंति ते॥ मृगसंगाद्भरतवद्भ्रंपस्यैवनिजस्थितेः॥४६॥ प्र
दीप्तैऽग्नौ निपातं वा वरं मन्येविषाशनम्॥ नत्वहं स्त्रैणसंबंधं कदाचिदपि कस्यचित्॥४७॥ धनादीनां
प्रसंगोऽपि न मे रुचिकरस्तथा॥ सुज्ञो लोऽपि दुराचारे प्रवृत्तो येन जायते॥४८॥ धनास्तस्याचासितिनो
पितुरा अष्टमतिर्नृपम्॥ निर्ममं ज्ञात्वा पधार्मिकं स्वयं वत्स्याददेशपासुतः स्वयम्॥४९॥ देशकालः क्रिया ध्यानं

स०जी०प्र० शास्त्रं दीक्षा तथा मनुः ॥ संगश्च यादृशस्तेषु तेन तादृक्कृतं फलम् ॥ ५० ॥ शुभैर्देशैः सेवितैस्तु शुभा बु- अ० ५८॥
॥१२५॥ द्धिर्भवेन्नृणाम् ॥ अशुभैस्तैर्भवेद्बुद्धिरशुभा नात्र संशयः ॥ ५१ ॥ यादृशी यस्य बुद्धिः स्यात्कर्म कुर्यात्स ता-
दृशम् ॥ कर्मानुरूपं च फलं प्राप्नुयाच्च ततः पुमान् ॥ ५२ ॥ असतो देशकालादीन्संसेवेत ततः सुधीः ॥ वि-
हाय ताञ्छुभानेव हिताय शुभानाश्रयेत् ॥ ५३ ॥ निपीतं मद्यभंगादि येन स्पृष्टं वा जने नरम् ॥ मादृक्पिता
पथा सद्यो नयत्युन्मत्ततां खलु ॥ ५४ ॥ तथैव स्त्रीधनं वापि मादृक्पिता ह्यसेवितम् ॥ उत्पथं प्रापयत्येव चि-
त्तं समपि सात्विकम् ॥ ५५ ॥ ईदृक्स्वभाव मे चैतद्वर्त्तते वस्तु सर्वथा ॥ स्वाभाविकं गुणं नैव हातुं शक्नो-
ति कश्चन ॥ ५६ ॥ स्त्रीणां वा लोधनादीनां प्रसंगे मम निश्चितम् ॥ स्वाभाविकी रुचिर्नास्ति सत्यमेतद्वदा-
म्यहम् ॥ ५७ ॥ स्फुरोत्तव वाणी याः मतिवा रोपितोचितः ॥ तेन मे स्थितिग्रुते चेतस्तत्त्वं ब्रूहि मे हितम् ॥
५८ ॥ सर्वेषां धर्ममर्यादा रक्षणेऽसि त्वमीश्वरः ॥ अतोऽत्र किंनु मे कार्यमेतदन्यत्र शाधि माम् ॥ ५९ ॥ कृ-
तव्रतउवाच ॥ प्रतिवाक्यं गुरोः श्रुत्वा नारायणमुनेरिति ॥ स्वामित्वं स्थापयंस्तस्मिन्स्वयं हर्षितमुवाच सः ॥ ६० ॥
॥ श्रीरामानंदस्वाम्युवाच ॥ सत्यमेतन्महाकार्यं त्वदुक्तं वेद्म्यहं नतु ॥ मया युक्तिः प्रतेनत्तु विचार्यैव न चा-
न्यथा ॥ ६१ ॥ समर्थो धर्मरक्षायामहं स्वाश्रितदेहिनाम् ॥ वर्त्ते हि सांप्रतं भूमौ सत्यमेतत्त्वयोच्यते ॥ ६२ ॥ ॥१२५॥

तथापि त्वयि सच्छिष्ये धुरं मय्यस्य सुव्रत ॥ निश्चितः कृतकार्योऽहं हातुमिच्छाम्यदो वपुः ॥ ६३ ॥ नत्वा र-
शोकं निदंम्य पक्षणाम्यत्र वैन धूर्वहम् ॥ अतो मद्वचनं तात कर्तुमर्हसि सर्वथा ॥ ६४ ॥ वर्णिनां व्रतभं-
गः स्यात्स्त्रीभिः संभाषणादिना ॥ इति त्वयोदितं यत्तत्सत्यमेव न संशयः ॥ ६५ ॥ अस्मेते वर्णिनो येषां ए-
स्त्र्यादिभिर्लुप्यते व्रतम् ॥ अस्मानुपङ्क्ति यस्त्वं तु न वर्णी प्राकृतोऽन्यसि ॥ ६६ ॥ वर्णिनं त्वं स्त्रीसहस्रेषु नि-
र्विकारं तथाऽनघ ॥ स्वर्णपुंजे च पतितं यां शक्तिरस्ति तवैव हि ॥ ६७ ॥ स्वयं नारायणः साक्षादरदाता त्व-
प्रभुः ॥ कामादेरक्षणं कर्त्तां राजते हृद्ये तव ॥ ६८ ॥ सर्वथैव समर्थस्त्वं विदितोऽसि मयांजसा ॥ अतस्त्विं र-
तनामेतान विहित्वा त्वमर्थ्यसे ॥ ६९ ॥ त्वदन्ये वर्णिनस्त्वं गस्त्री कथाश्रवणादपि ॥ भ्रष्टा भवेयुः सहसा-
किंपुनर्दर्शनादिभिः ॥ ७० ॥ संसर्गः स्त्रीधनादीनां साक्षोऽतः सर्वथैव नैः ॥ त्वं तीश्वरः स्वाश्रितानां कुरु ध-
र्मादिरक्षणम् ॥ ७१ ॥ कृतव्रतउवाच ॥ इत्याकर्ण्य गुरोर्वाक्यं मानयंस्तं सवर्णिराट् ॥ प्रतिजग्राह तद्वाक्यम्
निजन्नपि नृपते ॥ ७२ ॥ स्ववाचीत्यं स्वीकृतायां तेनाऽथ समुनीश्वरः ॥ उपवेश्यासने तं चंदनादिभिरार्चि-
चत ॥ ७३ ॥ महोत्सवं कारयित्वा गीतवाद्यपुरोगतम् ॥ सुप्रसन्नमनाः स्वामी स्वाश्रितानिदमब्रवीत् ॥ ७४
श्रीरामानंदस्वाम्युवाच ॥ शृण्वंतु मामकाः सर्वे गृहिणस्त्यागिनस्तथा ॥ अयं नारायणमुनिर्मम स्था

॥ स॰जी॰प्र॰५ नेऽस्ति निश्चितम् ॥ ७५ ॥ मनुष्याणां सुदुष्प्रापैः सेवन्नः सद्गुणैरयम् ॥ युष्माकं धर्मसंपाल्यपालने रस्ते अ॰ ५८ ॥
॥ १२६ ॥ वाञ्छितमान् ॥ ७६ ॥ तदेतद्दिनमारभ्यास्य यमसेवनमागमने ॥ सर्वैर्नैव न्निरिसाला ममपालैव सर्वथा ॥ ७७
॥ स्वामिन्नेवं करिष्यामस्त्वमुक्तेति ततो द्विजाः ॥ प्रोचुर्विर्णिराजं च तदोवाच पुनर्गुरुः ॥ ७८ ॥ महामुने
प्रसन्नोस्मि महात्मा पाद्ममान्तचि ॥ अतस्त्वं वाञ्छितान्सर्वान्वरान्वरय कांक्षितान् ॥ ७९ ॥ अदेयं नास्ति
मे किंचित्तुभ्यं ब्रह्मसांख्ययोगज्ञ ॥ महापुरुष तच्छ्रुत्वा निश्चितं निजवाञ्छितम् ॥ ८० ॥ सुव्रत उवाच ॥ इति सं
चोदितस्तेन वरार्थं स महामुनिः ॥ निजकं वच उवाचेदं सर्वजीवदयानिधिः ॥ ८१ ॥ श्रीशीतलदास उवाच ॥
यदि त्वं वरदानपात्रतामेवि तरतदातुमपेक्षितान्वरांस्त्वम् ॥ मृदुजपदसरोरुहद्वये मे मतिरचला
स्तु सदैव नेदृश् नौः ॥ ८२ ॥ इह च यदुरुदुःखमन्तकालेऽत्युग्रणां तवश्चि कदेशातु ज्यमाकु ॥ यदितरदपि
तत्र वै प्रभवानां भवतु ममास्य च ते तु ॥ यत्वते तु मम माऽत्यवतेतु सेत्त्वदुःखाः ॥ ८३ ॥ क्वचिदपि भुवि
रूपमतिकिनाजां निजकृतकर्मवशाद्वरप्रभोऽप्यम् ॥ इह यदुरु तथाप्यवस्य दुःखं तदपि ममास्तु न तु
प्रजेज्ञाते षाम् ॥ ८४ ॥ व्रजरमणकृपा च यत्र प्रथितगुणा ह्यभवेऽपुरा शसंतः ॥ मम भवतु सदैव तत्र वासो
न तु भवसक्तधियां क्वचित्प्रसंगे ॥ ८५ ॥ वाणी मे तु गुणकीर्तने भगवतः कर्णौ कथायाः स्मृतौ सेवायां च ॥ १२६ ॥

भुजौ स्मृतौ च हृदयं भूयाद्दृशौ लोचने ॥ कृष्णार्थं च मम क्रियाऽस्तु सकला शारीरकी मानसी दुःसंगः क्व
चनापि मास्तु हृदि मे देहित्वमेतान्वरान् ॥ ८६ ॥ सुव्रत उवाच ॥ एवं स भगवान्कृष्णो प्रार्थनारीतिमं
जसा ॥ सेवारीतिसमुद्रोश्च शिक्षयन्नात्मसंश्रितान् ॥ ८७ ॥ श्रीभगवस्थ स्वातुक्षतं न रनास्यंन शधिप ॥
ईश्वरोऽपि गुरुं नत्वा प्रार्थयामास भक्तवत् ॥ ८८ ॥ इति संप्रार्थयंतं तं श्रीपाच वचनं गुरुः ॥ मनोरथास्ते
संपूर्णा भविष्यंति न संशयः ॥ ८९ ॥ परोपकारैकपरायणाय नारायणायेति वरान्स दत्त्वा ॥ स्थितस्त
दीयानन पद्ममेव विलोकतेस्माऽस्थिरयात्मदृष्ट्या ॥ ९० ॥ तस्मै प्रसन्नोऽथ च सोपि कृष्णः स्वानिप्रिया य
त्नपयापार्थ बोधम् ॥ ददाव वितं विदधत्तमीशो विवेद तं सोपि निजेश्वरेवम् ॥ ९१ ॥ गोलोकसंस्थाक्षरदि
व्यधाम्नि यार्क्ष स दृश्यबृहद्दुना दो ॥ विलोक्य तेतारदामे समाने दवार्द्विनि मम लसद्घः ॥ ९२ ॥
चिरं निनाय ऽथ तमेव नक्त रक्षाविधानाय च धर्मगुप्से ॥ तदागतं तत्र वसत्सर्गोनिश्चितं ज्ञासी
न्नपूर्णकामः ॥ ९३ ॥ नारायणं तस्य विनोऽपि दिश्रो विदन्ना जना यतस्तु ॥ माकाशायद्देन मात्म
बुद्धमे कांतिकी भक्त वरोयतोऽसौ ॥ ९४ ॥ तस्मिंस्ततः शिष्यधियं विहाय निजेश्वरात्बुधा हृदि भावयन्
सः ॥ वृतस्तदा दीनजशिष्यमुख्यैस्ततः फणिग्राममियाय भूपः ॥ ९५ ॥ इति श्रीसत्संगिजीवने नारायण

११

॥ स॰ञी॰ स्व ॥

॥१२७॥

इति श्रीधर्मशास्त्रे श्रीयमप्रकरणे नारायणमुनिस्वामित्वस्थापननामैकोनषष्टितमोऽध्यायः ॥ स्व॰ ६० ॥

५९ ॥स्कन्द उवाच॥ एकादश्यां मोक्षदायां तत्र चक्रे महोत्सवम्॥ द्वादश्यां भोजयामास स साधून्स्विप्रा
न्सहस्रशः ॥१॥ दत्वा दानानि विप्रेभ्यः प्रातर्नर्मदाभिधां नदीम्॥ उपेत्य तत्र स स्नात्वा रहःस्थाने उपावि
शत्॥२॥ बद्धपद्मासनस्तस्मिन्नु समाधिं विदधद्धरिः॥ तदिङ्गुयाजहौ सद्यो मानुषीं तनुमुद्धवः ॥३॥ मुक्तो
दुर्वाससः शापाद्दर्शमेत्य पूर्ववत्॥ आवर्त्तयत् कृष्णमन्त्रं किंसिद्धदेहः स भूपते ॥४॥ विक्रमार्कशकान्ना
गनागरहस्तीदुसंमिते॥ वर्षे मार्गे त्रयोदश्यां शुक्ले सोऽन्तर्दधे गुरुः॥५॥ संकीर्त्तयंतो नामानि श्रीकृष्णस्य त
दा द्विजाः॥ तन्मुखैकदृशः शिष्या विविदुस्तमुपारतम्॥६॥ तत्सामर्थ्यमेत्य संवीक्ष्य नाडीप्राणविहीनता
म्॥ साधुनेचावबुद्धस्त्रं विश्रांतास्ते च सर्वशः॥७॥ हरिस्तु धैर्यमासाद्य देशकालोचितक्रियः॥ धर्मशा
स्त्रार्थपारीणः स्नात्वा केशानवापयत्॥८॥ पुनः स्नात्वा चंदनेनाचर्चयामास तद्वपुः॥ पुष्पाबीरगुला
लाद्यैस्तदानर्चननामन्त्र॥९॥ पितृमेधविधानेन क्रमात्कुर्वन्स तत्क्रियाः॥ विमानं कारयित्वाथ तस्मिं
स्तत्तेह्नं धारयत्॥१०॥ अनर्घ्यं सितसूक्ष्मेण वाससाच्छादितान्त्रिभिः॥ शिष्यैरन्यैः समं निन्ये स्नातैर्नद्यां वि
मानकम्॥११॥ विष्णुसूक्तं द्विजाः पेठुस्तदानीं कृष्णकीर्त्तनम्॥ मृदंगरूढ्रशे पेठेतं चकुः संतोऽप्युचस्तु ॥१२७॥

पः॥१२॥ नद्यास्तटे शुचिस्थाने तत्र विधाय चिते चिताम्॥ चक्रुः श्रीखंडतुलसीपिप्पलानाईदारुभिः॥१३
॥ तत्र तद्देहमाधाय स्नपितं स्रग्विभूषितम्॥ आज्यसिक्तं ततः कृष्णो ददाहोत्तपनाग्निना॥१४॥ आ
जेनुहाचमध्ये च ततो दग्धे कलेवरे॥ शाममस्थीनां भस्मावकृत्य तद्भस्म सोऽक्षिपत्॥१५॥ सस्नुः सर्वे
ततो नद्यां शिष्या हरिपुरःसराः॥ दत्वोदकं च गुरवे पुनः स्नांति स्म ते नृप॥१६॥ ततो गत्वा फणिग्रामम्
शुस्ते च शुचान्विताः॥ उपोषणं दिने तस्मिन्कुर्वंति स्म निरोदनः॥१७॥ द्वितीयेऽहनि पत्राणि लिखित्वा
कतिचिन्नरान्॥ नानादेशस्थभक्तेभ्यः प्रेषयत्स सदाग्रणीः॥१८॥ ते वाचयित्वा पत्राणि ज्ञात्वांतर्द्धिं गुरो
र्ध्रुवम्॥ भृशं शुचाकुलाश्चासन्पुरुषाः स्त्रियो द्विजाः॥१९॥ हित्वा सर्वाणि कार्याणि सद्यो भागवद्दिणो
जनाः॥ शक्तितो धनमादाय तत्राजग्मुस्त्वरान्विताः॥२०॥ वर्णिनस्त्यागिनश्चैते वृत्तांतमतिदुःसहम्॥ श्रु
त्वाप्रापुः शुचं भूरिं ब्रह्मभूयं गता अपि॥२१॥ यत्र यत्र स्थिता ये ये ते ते सद्यस्ततस्ततः॥ फणिग्राममुपा
जग्मुः स्नात्वा भक्ताः सहांबरम्॥२२॥ तत्रागतेभ्यस्तेभ्यश्च साधुहम्भ्योपयोचितम्॥ वासस्थानादि सर्वा
दान्नारायणमुनिर्नृपः॥२३॥ द्वितीयदिनतो नित्यं त्रयोदशदिनावधि॥ सार्थो श्रीनगवन्नीतामपराह्ले
ष्णोच्छ्रुतिः॥२४॥ अहानि द्वादश तथा भक्तांशं चैवं लवणं नृप॥ आशौचनियमस्थो सौ नामक्षयदुदा

॥स॰जी॰प्र॰५ रधीः॥२५॥संध्याह्निकार्यमुख्यानिनित्यकर्माणितुस्वयम्॥आशौचेपिस्मृतिवचाच्चकारासौस्तुनास्य अ॰६०॥
॥२२८॥ शात्॥२६॥आशौचांत्यदिनेचकेनवश्राद्धंगुरोःसच॥एकादशाहिकंकर्मवृषोत्सर्गयुतंततः॥२७॥त्रयो
दशपदानीरविप्रेभ्योऽष्टविधानिसः॥दशदानानिचश्राद्धरूपादीनिसदक्षिणम्॥२८॥यथाविधिचका
रऽथकर्मसद्वादशाहिकम्॥ब्राह्मणान्भोजयामासतत्रतत्रचकर्मणि॥२९॥त्रयोदशाहिकंकर्मचकार
चततोहरिः॥तत्रचाभ्यर्चयामासत्रिंशतोब्रह्मचारिणः॥३०॥तेभ्यस्तदुचितान्येववासांस्यैणाजिनानि
च॥मणिप्रवालमालादिददौतांश्चाप्यभोजयत्॥३१॥स्वस्तिवाचनकर्मांतेतस्मैचगृहिणोजनाः॥स्वस्व
शक्त्यनुसारेणवासांसिचधनंददुः॥३२॥तस्मिन्दिनेनुतान्सर्वान्गृहस्थास्त्यागिनोद्विजान्॥तत्राम
स्थांश्चातिथींश्चभोजयामासवर्णिराट्॥३३॥गीतावाचकविप्रंचपूजयामासतद्दिने॥वासोभूषाचंद
नाद्यैर्दक्षिणाभिश्चभूपते॥३४॥यथोचितंनृपविधायसोऽखिलंक्रियाकलापंविधिनौर्ध्वदैहिकम्
गुरोःस्वकीयस्यसतीर्थ्यमंडलंसमग्रमेकत्रसमाह्वयत्ततः॥३५॥इतिश्रीसत्संगिजीवनेनारायणचरि
त्रेधर्मशास्त्रेप्रथमप्रकरणेरामानंदस्वामितिरोधानतदौर्ध्वदैहिकक्रियाविधिनामाषष्टितमोऽध्यायः
॥६०॥ ॥२२८॥

ब्र॰हरिस्वरूपानंदजिनुआपानुछे

